232 संस्कृत

स्तोत्र.

-ग्रं. नं. १५८४

# अन्नपूर्णा स्तुतिः

"Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

६१८/स्तो. २

(1)

ह्रांबीजं ॥ सौः शक्तिः ॥ क्लींकीलकं ॥ ममचतुर्विध
पुरुषार्थसिध्यर्थेजपेविनियोगः ॥ ईश्वरऋषयेन
मः शिरसि ॥ अनुष्टुप्छंदसेन० मुखे ॥ श्रीकामदु
घान्नपूर्णेश्वरीदेवतायै० हृदये ॥ ह्रांबीजाय० द
क्षस्तने ॥ सौःशक्तये० वामस्तने ॥ क्लींकीलकाय०
मध्ये ॥ विनियोगः सर्वांगे ॥ अथन्यासाः ॥ ह्रीं अं
गुष्ठाभ्यां० सौः तर्जनीभ्यां० श्रीं मध्यमाभ्यां० क्लीं
अनामिकाभ्यां० ॐ कनिष्ठिकाभ्यां० नमोभगवत्य

Rajawade Sanshodhan Mandal, Dhule and The Yashwantrao Chavan Pratishthan, Mumbai

(२)

न्नपूर्णे मम अभिलषितं अन्नं देहि स्वाहेति करतलक
रपृष्ठाभ्यां० एवं हृदयादिन्यासान्कृत्वा ॥ ततोउ
च्चारक्रमेण न्यासः ॥ ह्रीं आधारे १ सौः हृदि २ श्री
भ्रूमध्ये ३ क्लीं ब्रह्म रंध्रे ४ ॐ तालौ ५ नमः
भगवत्यन्नपूर्णे कंठे ७ ममाभिलषितं हृदि ८ अ
न्नं देहि नाभौ ९ स्वाहा मूलाधारादिपादपर्यंतं
१० ॥ सर्वेण मूलेन व्यापकं त्रिः ३ ॥ अथ ध्यानं ॥
रक्तां विचित्रनयनां नवचंद्रचूडाम् इंदुप्रसन्नव २

(2A)

दनांस्तनभारनम्रां॥ नृत्यंतमिंदुशकलाभरणंवि
लोक्यहृष्टांभजेभगवतींभवदुःखहंत्रीं॥१॥इति
ध्यात्वामानसोपचारैःसंपूज्यमहामुद्रयानमस्कृ
त्यजपेत्॥जपांतेस्तुवीत॥ मूलाधारादिचक्रेशी
षडध्वान्वयपारगा॥ आनंदलतिकासाक्षादन्न
पूर्णामहेश्वरी॥१॥ मूलशृंगाटमध्यस्थाबिंदुनाद
कलाश्रया॥ नित्यानंदानिराधाराविख्यालाविल
सत्कुचा॥ २॥ विष्टपेशीपरालक्ष्मीःकामस्तारोन

"Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(3)

तिस्तथा॥भगवत्यन्नपूर्णेतिममाभिलषितंतथा॥
॥३॥अन्नंदेहिलतःस्वाहामंत्रसारेतिकीर्तिता॥
सप्तविंशतिवर्णात्मायोगिनीगणसेविता॥४॥स
र्वोत्तीर्णाप्रकाशाख्याविमर्शानंदरूपिणी॥विश्वते
जसरूपेणप्राज्ञतुर्यस्वरूपतः॥५॥विमर्शाख्येति
कथिताचतुःस्रोतःस्वरूपिणी॥जाग्रत्स्वप्नसुषु
प्त्याख्यातुर्यरूपस्यनामभिः॥६॥ख्यातेयंत्रिषु
लोकेषुदर्शितासाचतुष्टयी॥श्रीविद्याचक्रसंके



Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(३अ)

तामध्यवाग्भवविग्रहा ॥ ७ ॥ भुवनादिचतुष्कोणचतुरा
न्मायमध्यगा ॥ पूर्वाम्नायरुद्रशक्तिः साक्षाच्छ्रीभुवना
ख्यया ॥ ८ ॥ ख्यातेयंकमलानाम्नारुद्राणीदक्षिणां
बिका ॥ स्कभगानामधेयातुकुब्जेशीपश्चिमांबिका ॥ ९
पराविद्याभिधानेनरक्तानाख्योत्तरात्मिका ॥ ओघ
त्रयपरामर्शाज्जोघत्रयसमाश्रया ॥ १० ॥ आम्नायमो
तस्मूत्रस्थाकापालीकुलसंभवा ॥ त्रैलोक्यमोहनाका
रात्मकत्वात्त्रिपुराश्रया ॥ ११ ॥ सर्वाशापूरकागुप्ताचक्रे

(५)

श्रीत्रिपुरेश्वरी॥सर्वसंक्षोभणगतामहागुप्ततराहृता॥
॥१४॥सुंदरीचक्रमध्यस्थासर्वसौभाग्यदायिनी॥सं
वरिशा३ प्रदायक्रमगलासर्वदापुरवासिनी॥१५॥सर्वार्थसा
धकगलाकुलकौलनिवासिनी॥श्रीदेवीवर्द्धिताका
रासर्वरक्षानुगापिच॥१६॥निगर्भाख्यामालिनी
चसर्वरोगहरापरा॥रहस्यात्मपरासिध्धासर्वसि
द्धिप्रदायिनी॥१७॥परापररहस्यस्थासर्वांबाचक्रना
यिका॥सर्वानंदमयीसाक्षात्ब्रह्मलिपूर्वरहस्यगा॥१८

५

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(5A)

महाप्रभावसंयुक्तामहात्रिपुरसुंदरी॥ संक्षोभद्रावि
णीमुद्राकर्षिणीवश्यकारिणी॥१९॥ सर्वोन्मादिनि
कादेवीमहांकुशमदालसा॥ खेचरीसर्वसुखलभ्यागूढ
चारसुखावहा॥२०॥ दक्षहस्तेहेमदर्वीसेविनामी
क्षितान्नदा॥ वामहस्तेसुधापात्रेपूजकाभीक्षितप्र
दा॥२१॥ सुखसंवित्तिसकलभावाममार्गस्यनायिका
श्यामवर्णावरारोहापीताभावरवर्णिनी॥२२॥ रस
नाकिंकिणीजालवर्धमानाकुलांगना॥ सुस्मिताव

(5)

दनज्योत्स्नापूरिताखिलदिङ्मुखा ॥२३॥ ललाटार्द्धे
दुचिकुराकुटिलालकपल्लवा ॥ स्कंदरम्भ्रूलताकांतिः
पूर्णचंद्रनिभानना ॥२४॥ सलीलनयनापांगललि
ताननपंकजा ॥ नखकांतिमहाज्योत्स्नापूरिताशा
समंततः ॥२५॥ पीनोन्नतकुचद्वंद्वत्रिवलीयुतमध्य म
मा ॥ स्फुरन्निर्मलावर्तनाभिःस्थवृत्तेतिकृशोदरी ॥२६
रोमराजिप्रभायुक्ताजघनांचितमेखला ॥ कांतोरुक
दलीसौम्यनितंबरूलशोभना ॥२७॥ वृत्तजंघागूढ ५

(5a)

गुल्फपादपद्मयुगान्विता॥कर्पूरक्लिन्नतांबूलराजि
ताधरपल्लवा॥२८॥कस्तूरिगंधकर्पूरपंकचर्चितविग्र
हा॥सर्वावयवसंपूर्णा शिवचित्तमनोहरा॥२९॥अ
न्नदानकृतोत्साहा भक्तचिंतितफलप्रदा॥भूःस्वर्गफ
लदा लक्ष्मीरन्नदानैकरक्षिता॥३०॥निरामयाहृत
क्लेशा स्कंदैकफलदायिनी॥भोगप्रदा भगावासा भग
मूला भगोदरी॥३१॥श्रीप्रदा श्रीस्तुता सौम्या माया
रूपापराजिता॥परमायुःप्रदा गौरी वशीकृतजगत्त्र

"Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

यी॥३२॥यस्यादर्वीपूरितान्नमग्रेदृष्ट्वादरिद्रुता॥अपै
तिसल्लसाभीत्याहृताह्मितिकंपिता॥३३॥यःकश्चि
च्छ्रच्छशाल्यन्नंस्पृष्ट्वासन्मानयांबिकां॥ददात्यमित शिवां३
मर्थिभ्यःसान्नपूर्णाकुलांगना॥३४॥दारिद्र्यशैल
दंभोलिंयांदेवींदेशिकोत्तमः॥स्मृत्वाकृतार्थोविचरे
त्सान्नपूर्णान्नपायिनी॥३५॥यामलाष्टकवर्गस्थारु
द्रदेवीमहद्यशा॥कुलशीलरसाधाराधातुर्वादरस
प्रदा॥३६॥नित्यानंदसरोजश्रीर्याचिदानंदरूपिणी



Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(6A)

दर्वीपात्रकरद्वंद्वहृतभक्तदरिद्रता ॥ ३७ ॥ चित्सुधा
भरितानंदकरन्यासससमावृता ॥ मूलाधारचतुःप
त्रकर्णिकामध्यवर्तिनी ॥ ३८ ॥ योगींद्रवीरमध्यस्था
सच्चिदानंदरूपिणी ॥ स्वाधिष्ठानाब्जनिलया षट्
पत्रग्रंथिवासिनी ॥ ३९ ॥ आघ्राणमुद्रासंयुक्ता
मातृकावर्णमालिका ॥ मणिपूरकविश्रांतिर्दशान
छदनिर्वृतिः ॥ ४० ॥ मध्यनाडीमध्यगतायोगगम्या
सनातनी ॥ अनाहताब्जसंहृष्टा द्वादशारांतरास

"Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

सहस्रदलमध्यस्थादिव्यसिद्धनरोर्ध्वगा ॥ भ्रूमध्यपद्मनिलया
स्वानुबंधनिवासिनी ॥५५॥ ५

(७)

ना ॥ ४१ ॥ विसुद्धचक्रमध्यस्थाषोडशारेभसन्नधीः
आज्ञाचक्रगताचांद्रीद्विदलाग्रेसुधाप्रदा ॥ ४२ ॥
तत्वार्थबीजनिलयापंचबाणैकवर्द्धिता ॥ निरालं
बपदावस्थाव्योमपद्मविलासिनी ॥ ४३ ॥ ध्वसं
ज्ञपदातीताशांखिनीवंधभामिनी ॥ चंद्रार्कानल
संघट्टगलितामृतचंद्रिका ॥ ४४ ॥ केशादिमुख
पादांतमातृकान्यस्तविग्रहा ॥ आधारेहृदिभ्रूम
ध्येब्रह्मरंध्रेचताल्लुके ॥ ४५ ॥ इंदौकंठेचहृन्नाभि- ८

(७१)

मूलाधारादिपादयोः॥ भवानीमूलविद्यायायान्य
सैद्धर्णानितुक्रमात्॥ ४६॥ द्वादशांतेसरोजश्रीः षो
डशांतेकलानिधिः॥ निर्वाणपदयोगरूढाचिद्दीपकल
कज्जला॥ ४७॥ तडित्कोटिप्रभायुक्ताब्रह्मविद्यामृ
तांबुधिः॥ देवतामंत्रयंत्रैक्यदेशिकोत्तममानसा
॥ ४८॥ अन्तमध्यगतादेवीहंक्षःसोहंसाख्यमंदिरा
त्रिकोणमातृकापञ्चचतुरस्रांतरासना॥ ४९॥
भुवनादिजगन्मालात्रिशक्तिश्चतुराद्वृत्तिः॥ महा

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

(8)

योगैकतत्त्वरुपासंविद्विद्याधिदेवता॥५०॥मंत्रा
णांचैवयंत्राणांयंत्रिणांमंत्रिणांतथा॥ददात्यन्नं
स्वयंसाक्षादन्नपूर्णामहेश्वरी॥५१॥अन्नपू
र्णास्तुतिःसेयंकृतापंचाशिकामया॥विख्या
तात्रिषुलोकेषुकल्पवल्लीतिनामतः॥५२॥इयं
तुजपतांशीघ्रंमहदैश्वर्यदायिनी॥जन्मकोटिद
रिद्रत्वंहत्वाश्रियंददातिसा॥५३॥इमांस्तुति
पठेद्यस्तुपापघ्नींसर्वकामदां॥तस्यनश्यंतिपा ६

A joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(8A)

पानिवन्हिनातूलराशिवत्॥५४॥इयंसापरमाश्चु
ष्यंश्रियंवैश्रवणाधिकां॥ददातिपरमांप्रीतिंपुत्रान्
विद्यागुणान्वितान्॥५५॥किमत्रबहुनोक्तेनयद्य
दिच्छतिसाधकः॥अन्नपूर्णेश्वरीसाक्षात्तत्तदिच्छति
नान्यथा॥५६॥दातव्येयंकृतिःसम्यग्गुरुभक्ता
यधीमते॥आत्मज्ञान[illegible]शस्ताकामधेनुःस्वसेवि
नां॥५७॥पुनःपुनरिमांध्यात्वाइच्छामीतिमुहुर्मुहुः
कृतार्थामानवालोकेभवेयुःसत्यमीदृशं॥५८॥इयं

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

(९)

पंचाशिकानित्यमन्नपूर्णाधिदेवता॥ददातिविपुला
न्भोगान्जपतांस्फुरपादपः॥५९॥हृदयेवर्तलेयस्यश्री
मदन्नाधिदेवता॥दृश्यतेरुद्रतुल्योसावनेकभुवनो
त्सवः॥६०॥अस्याःप्रसादात्संजाताकुबेरस्यस
मृद्धयः॥वरुणस्यहैश्वर्यंवशीकरणसाधनं॥६१ त
लक्ष्मीविलासविभवंविष्णोर्दत्तंपुरानया॥श्रिया
विष्णुपतित्वंचप्राप्तमस्याःप्रसादतः॥६२॥शंभु
नाचंडिकापत्यंगौर्याशिवपतेःफलं॥साधितंपर ९

Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(१A)

याभक्त्याजपहोमार्चनादिभिः ॥६३॥ गंधर्वाणांकि
न्नराणांगुह्यकानांतथैवच ॥ सिद्धानांचचमत्कारं
जरामरणवर्जितं ॥६४॥ ऋषीणांचमुनीनांचवी
राणांयोगिनांतथा ॥ सर्वतत्वंप्रभावत्वमनयाद
समादरात् ॥६५॥ इमांस्तुतिंजपेद्यस्तुप्रातर्न्नि
त्यमतंद्रितः ॥ यश्चकश्चनतस्यैवमहासिद्धिर्भवि
ष्यति ॥६६॥ मंत्रदेवाधिदेवाश्चसंतुष्टास्त्वन्नपूर्ण
या ॥ वसंतिगेहेतस्यैवनिश्चलेनांतरात्मना ॥६७॥

इतीयंसर्वदासेव्यासद्भिरागमपारगैः॥ अन्नपूर्णेश्व
रीबुध्यासर्वंपश्यतिचात्मवित्॥ ९९॥ ॥इतिरु
द्रयामलेअन्नपूर्णेश्वरीपंचाशिकाकल्पवल्लीसमा
प्ता॥ ॥अथान्यास्कलिः॥रुद्रतांडवविलोकनलो
लांमद्दवक्तनयनांभवकांतां॥अन्नदाननिरतांज
ननींतांचिंतयेदुषसि[illegible]दुकूलां॥२॥आदाय
दक्षिणकरेणसुवर्णदर्वींदुग्धान्नपूर्णमितरेणच
रुक्मपात्रं॥अन्नप्रदाननिरतांनवहेमवर्णामंबां 

"Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(10A)

भजेकनकभूषणमाल्यशोभां॥२॥भगवतिभव
रोगात्पीडितंदुष्कृतोत्थात्सकलदुहितृकलत्रोपद्रवे
णानुयातं॥ विलसदमृतदृष्ट्यावीक्ष्यविभ्रांतचि
त्तंसकलभुवनमातस्त्राहिमामोंनमस्ते॥३॥मा
हेश्वरीमाश्रितकल्पवल्लीमहंभवच्छेदकरींभवानिं
क्षुधार्तजायातनयाद्युपेतस्त्वामन्नपूर्णेशरणंप्र
पद्ये॥४॥इत्यन्नपूर्णास्तुतिबद्धमेतत्श्लोकत्रयं
यःपठतीहभक्त्या॥तस्मैददात्यन्नसमृद्धिमंबाश्रि

(11)

यंचविद्यांचयशश्चकीर्तिं॥५॥ ॥इत्यन्नपूर्णा
स्तुतिःसमाप्ता॥ ॥श्रीउमामहेश्वरार्पणं॥
शके १७५१ प्रमाथीनामसंवत्सरेअश्वीनकृष्णद्वा
दशीदिनेजीर्णपुरेलिखितेयंश्रीमदुमामहेश्व
रचरणसरोजमिलिंदायबाकोपनामकअंबा
दासात्मजहरभट्टायत्र्यंबकग्रामनिवासिने
दत्तमस्ति॥ ॥श्रीः॥श्रीः॥श्रीः श्रीः श्रीः

...Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

## मूळ प्रत पाहण्यासाठी संपर्क

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com